# 5 शीलायाः प्रवासः



**सविता** : (भ्रमणभाषं धृत्वा) हरिः ॐ ।

**शिक्षिका** : हरिः ॐ । कः वदति ?

**सविता** : अहं शीलायाः माता वदामि । प्रवासे मम पुत्री अस्ति ।



**शिक्षिका** : आम् अस्ति । किञ्चित् कार्यम् अस्ति वा ?

**सविता** : आम्, अहं तया सह वार्तालापं कर्तुम् इच्छामि । (शिक्षिका शीलां प्रति भ्रमणभाषं प्रेषयति ।)

**शीला** : अम्ब, कथम् अस्ति सर्वं कुशलं वा ?



**सविता** : आम्, अहं कुशलिनी । भवत्याः प्रवासः कथं प्रचलति ?

**शीला** : प्रवासः तु सम्यक् प्रचलति । अधुना अहम् अजन्तागुहायाम् अस्मि ।

**सविता** : शोभनम् । तत्र किं किम् अस्ति ?

**शीला** : अत्र अनेकानि शिल्पानि च चित्राणि सन्ति ।

**सविता** : तत्र कानि चित्राणि सन्ति ?

**शीला** : भगवत: बुद्धस्य शिल्पं सुन्दरम् अस्ति । अन्यत् च चतुर्मुखस्य हरिणस्य चित्रम् अपि मनोहरम् अस्ति । अत्र बहूनि सुन्दराणि चित्राणि अपि सन्ति ।

**सविता** : पद्मपाण: चित्रं तत्र अस्ति वा ?

**शीला** : आम्, अस्ति । अस्माभि: सह मार्गदर्शक: अपि अस्ति ।

**सविता** : स: किं कथयति ?

**शीला** : स: बौद्धगुहाया: विषये अस्माभि: सह वार्तालापं करोति । अपि च, गुहाया: इतिहासम् अपि कथयति ।

**सविता** : तेषां स्थानानां कानिचित् छायाचित्राणि आनयतु ।

**शीला** : अवश्यम् आनेष्यामि ।

**सविता** : अजन्तात: प्रवास: कुत्र गमिष्यति ?

**शीला** : अजन्तात: वयं धुष्णेश्वरं, धुष्णेश्वरत: शीरडीम्, शीरडीत: त्र्यम्बकेश्वरम्, त्र्यम्बकेश्वरत: नासिकं गमिष्याम: ।

**सविता** : शोभनम्, प्रवास: शिक्षणस्य भाग: एव अस्ति । तर्हि सम्यक् रीत्या प्रवासं करोतु । भवती प्रवासे यत् यत् पश्यति तत् तत् सर्वं टिप्पणीपुस्तके लिखतु ।

**शीला** : आम्, अवश्यं लेखिष्यामि ।

**सविता** : अपि च, प्रवासस्थानस्य विशेषतां तथा तस्य स्थानस्य इतिहासविषये अपि लिखतु ।

**शीला** : अवश्यम् । भवतु, नमो नम: ।

**सविता** : नमो नम: ।

## टिप्पणी

**भ्रमणभाषः** મોબાઈલ (ફોન) **शीलायाः** શીલાનો, **तस्यै** તેણીને **अम्ब** હે માતા **अधुना** અત્યારે **भवत्याः** આપનો (સ્ત્રીલિંગ) **कथम् अस्ति** કેમ છે ? **गुहायाम्** ગુફામાં **चतुर्मुख** ચાર મોઢાંવાળું **पद्मपाण्याः** પદ્મપાણિનું **मार्गदर्शकः** ભોમિયો, ગાઈડ **सम्यक् रीत्या** સારી રીતે **बौद्धगुहायाः** બૌદ્ધ ગુફાની **अस्माभिः सह** અમારી સાથે **टिप्पणीपुस्तकम्** નોટબુક **आनयतु** લાવજો.

## स्वाध्यायः

**1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :**

भ्रमणभाषः, किञ्चित्, प्रेषयति, सम्यक्, प्रचलति, अजन्तागुहायाम्, चतुर्मुखस्य, पद्मपाणेः, बौद्धगुहायाः, त्र्यम्बकेश्वरम्, धुष्णेश्वरतः, टिप्पणीपुस्तकम्

**2. નીચેના પ્રશ્નોના જવાબ સંસ્કૃત ભાષામાં આપો :**

(1) का दूरभाषं करोति ?

(2) शीला कस्याः पुत्री अस्ति ?

(3) शीला कुत्र गच्छति ?

(4) शीला किं किं पश्यति ?

**3. ઉદાહરણ મુજબ આપેલાં વાક્યોને પ્રશ્નવાક્યમાં ફેરવો :**

**ઉદાહરણ :** शीला अजन्तागुहायाम् अस्ति ।

शीला कुत्र अस्ति ?

(1) महेशः ऊद्याने अस्ति ।

(2) फरिदा वाटिकायाम् अस्ति ।

(3) सुनन्दा शालायाम् अस्ति ।

**ઉદાહરણ :** शीला <u>गृहत:</u> मन्दिरं गच्छति ।

शीला <u>कुत:</u> मन्दिरं गच्छति ?

शीला गृहत: कुत्र गच्छति ?

(1) नरेन्द्र: कार्यालयत: गृहं गच्छति ।

(2) विनय: क्रीडाङ्गणत: वाटिकां गच्छति ।

(3) अलका पालनपुरत: गान्धीनगरं गच्छति ।

## 4. ઉદાહરણ મુજબ વાક્યો બનાવો :

**ઉદાહરણ :** नटराज: चित्रम् । नटराजस्य चित्रम् अस्ति ।

(1) वेदान्त: पुस्तकम् । ____________________

(2) पार्थ: कन्दुकम् । ____________________

(3) कल्पेश: लेखनी । ____________________

(4) कर्ण: कुण्डलम् । ____________________

(5) निसर्ग: गृहम् । ____________________

**ઉદાહરણ :** शीला पुस्तकम् ।

शीलायाः पुस्तकम् अस्ति ।

(1) रेखा द्विचक्रिका । ____________________

(2) विद्या प्रभावः । ____________________

(3) कृपा आसन्दः । ____________________

(4) मीना पाठशाला । ____________________

(5) अनीक्षा शाटिका । ____________________

**5. આપેલાં વાક્યોને સંસ્કૃત ભાષામાં લખો :**

(1) આરતી જામનગરથી રાજકોટ જાય છે.

____________________

(2) હર્ષા અમરેલીથી જૂનાગઢ જાય છે.

____________________

(3) મિહીર અમદાવાદથી સુરત જાય છે.

____________________

(4) કુમાર ભુજથી અમદાવાદ જાય છે.

____________________

(5) ઉષા વડોદરાથી પાલનપુર જાય છે.

____________________

**6. તમારા ગામમાં આવતી બસ ક્યાંથી અને કયા કયા સ્થળેથી આવે છે, તેનું વર્ણન સંસ્કૃતમાં કરો.**

જેમકે,

लोकयानं हिंमतनगरतः इडरं गच्छति । इडरतः वटपल्लीं गच्छति । वटपल्लीतः भावनगरं गच्छति ।

## संस्कृतसामयिकानां सूचिः

| નામ | પ્રકાર | સ્થળ |
|---|---|---|
| • गाण्डीवम् | साप्ताहिक | वाराणसी |
| • उद्यानपत्रिका | मासिक | आन्ध्रप्रदेश |
| • अभिनवसंस्कृतम् | वार्षिकी | कानपुर |
| • अनादिवाक् | त्रैमासिक | नई दिल्ली |
| • अर्वाचीनसंस्कृतम् | त्रैमासिक | नई दिल्ली |
| • गीर्वाणसुधा | मासिक | मुम्बई |
| • दिव्यज्योति; | मासिक | शिमला |
| • पारिजातम् | मासिक | कानपुर |
| • संस्कृतसन्देश | दैनिक | वडोदरा |
| • साम्प्रतम् | मासिक | अमदावाद |
| • सम्भाषण सन्देशः | मासिक | बेंङ्गलुरुः |
| • रसना | मासिक | केराला |